# shrIstutiH by Swami Vedanta Desika

# શ્રીસ્તુતિઃ

## Document Information

Text title : shrIstutiH

File name : shriistuti.itx

Category : devii, lakShmI, stotra, vedAnta-deshika, devI

Location : doc_devii

Author : Swami Vedanta Desika (Ramanuja Sampradaya)

Transliterated by : WebD

Proofread by : Ravin Bhalekar ravibhalekar at hotmail.com

Description-comments : Also known as kanakadhArAlakShmIstavarAjaH

Latest update : June 4, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 4, 2022

*sanskritdocuments.org*

shrIstutiH by Swami Vedanta Desika

# શ્રીસ્તુતિઃ

શ્રીકનકધારાલક્ષ્મીસ્તવરાજઃ

શ્રીગણેશાય નમઃ ।
શ્રીમતે રામાનુજાય નમઃ ।
શ્રીમાન્વેઙ્કટનાથાર્યઃ કવિતાર્કિકકેસરી ।
વેદાન્તાચાર્યવર્યો સન્નિધત્તાં સદા હૃદિ ॥

ઈશાનાં જગતોઽસ્ય વેઙ્કટપતેર્વિષ્ણોઃ પરં પ્રેયસીં
ત્વદ્વક્ષસ્થલનિત્યવાસરસિકાં તત્ક્ષાન્તિસંવર્દ્ધિતીમ્ ।
પદ્માલઙ્કૃતપાણિપલ્લવયુતાં પદ્માસનસ્થાં શ્રિયં
વાત્સલ્યાદિગુણોજ્જ્વલાં ભગવતી વન્દે જગન્માતરમ્ ॥

માનાતીતપ્રથિતવિભવાં મઙ્ગલં મઙ્ગલાનાં વક્ષઃપીઠં
મધુવિજયિનો ભૂષયન્તીં સ્વકાન્ત્યા ।
પ્રત્યક્ષાનુશ્રવિકમહિમપ્રાર્થિનીનાં પ્રજાનાં
શ્રેયોમૂર્તિં શ્રિયમશરણસ્ત્વાં શરણ્યાં પ્રપદ્યે ॥ ૧॥

આવિર્ભાવઃ કલશજલધાવધ્વરે વાઽપિ યસ્યાઃ
સ્થાનં યસ્યાઃ સરસિજવનં વિષ્ણુવક્ષઃસ્થલં વા ।
ભૂમા યસ્યા ભુવનમખિલં દેવિ દિવ્યં પદં વા
સ્તોકપ્રજ્ઞૈરનવધિગુણા સ્તૂયસે સા કથં ત્વમ્ ॥ ૨॥

સ્તોતવ્યત્વં દિશતિ ભવતી દેહિભિઃ સ્તૂયમાના
તામેવ ત્વામનિતરગતિઃ સ્તોતુમાશંસમાનઃ ।
સિદ્ધારમ્ભઃ સકલભુવનશ્લાઘનીયો ભવેયં
સેવાપેક્ષા તવ ચરણયોઃ શ્રેયસે કસ્ય ન સ્યાત્ ॥ ૩॥

યત્સઙ્કલ્પાદ્ભવતિ કમલે યત્ર દેહિન્યમીષાં
જન્મસ્થેમપ્રલયરચના જઙ્ગમાજઙ્ગમાનામ્ ।

તત્કલ્યાણં કિમપિ યમિનામેકલક્ષ્યં સમાધૌ
    પૂર્ણં તેજઃ સ્ફુરતિ ભવતીપાદલાક્ષારસાઙ્કમ્ ॥ ૪॥

નિષ્પ્રત્યૂહપ્રણયઘટિતં દેવિ નિત્યાનપાયં વિષ્ણુસ્ત્વં
    ચેત્યનવધિગુણં દ્વન્દ્વમન્યોન્યલક્ષ્યમ્ ।
શેષશ્ચિત્તં વિમલમનસાં મૌલયશ્ચ શ્રુતીનાં
    સમ્પદ્યન્તે વિહરણવિધૌ યસ્ય શય્યાવિશેષાઃ ॥ ૫॥

ઉદ્દેશ્યત્વં જનનિ ભજતોરુજ્ઝિતોપાધિગન્ધં
    પ્રત્યગ્રૂપે હવિષિ યુવયોરેકશેષિત્વયોગાત્ ।
પદ્મે પત્યુસ્તવ ચ નિગમૈર્નિત્યમન્વિષ્યમાણો
    નાવચ્છેદં ભજતિ મહિમા નર્તયન માનસં નઃ ॥ ૬॥

પશ્યન્તીષુ શ્રુતિષુ પરિતઃ સૂરિવૃન્દેન સાર્ધં
    મધ્યેકૃત્ય ત્રિગુણફલકં નિર્મિતસ્થાનભેદમ્ ।
વિશ્વાધીશપ્રણયિની સદા વિભ્રમદ્યૂતવૃત્તૌ
    બ્રહ્મેશાદ્યા દધતિ યુવયોરક્ષશારપ્રચારમ્ ॥ ૭॥

અસ્યેશાના ત્વમસિ જગતઃ સંશ્રયન્તી મુકુન્દં
    લક્ષ્મીઃ પદ્મા જલધિતનયા વિષ્ણુપત્નીન્દિરેતિ ।
યન્નામાનિ શ્રુતિપરિપણાન્યેવમાવર્તયન્તો
    નાવર્તન્તે દુરિતપવનપ્રેરિતે જન્મચક્રે ॥ ૮॥

ત્વામેવાહુઃ કતિચિદપરે ત્વત્પ્રિયં લોકનાથં
    કિં તૈરન્તઃકલહમલિનૈઃ કિઞ્ચિદુત્તીર્ય મગ્નૈઃ ।
ત્વત્સમ્પ્રીત્યૈ વિહરતિ હરૌ સમ્મુખીનાં શ્રુતીનાં
    ભાવારૂઢૌ ભગવતિ યુવાં દમ્પતી દૈવતં નઃ ॥ ૯॥

આપન્નાર્તિપ્રશમનવિધૌ બદ્ધદીક્ષસ્ય
    વિષ્ણોરાચખ્યુસ્ત્વાં પ્રિયસહચરીમૈકમત્યોપપન્નામ્ ।
પ્રાદુર્ભાવૈરપિ સમતનુઃ પ્રાધ્વમન્વીયસે ત્વં
    દૂરોત્ક્ષિપ્તૈરિવ મધુરતા દુગ્ધરાશેસ્તરઙ્ગે ॥ ૧૦॥

ધત્તે શોભાં હરિમરકતે તાવકી મૂર્તિરાદ્યા
    તન્વી તુંગસ્તનભરનતા તપ્તજામ્બૂનદાભા ।
યસ્યાં ગચ્છન્ત્યુદયવિલયૈર્નિત્યમાનન્દસિન્ધા-
    વિચ્છાવેગોલ્લસિતલહરીવિભ્રમં વ્યક્તયસ્તે ॥ ૧૧॥

આસંસારં વિતતમખિલં વાઙ્મયં
    યદ્વિભૂતિર્યદ્ભ્રૂભઙ્ગાત્કુસુમધનુષઃ કિઙ્કરો મેરુધન્વા ।
યસ્યાં નિત્યં નયનશતકૈરેકલક્ષ્યો મહેન્દ્રઃ
    પદ્મે તાસાં પરિણતિરસૌ ભાવલેશૈસ્ત્વદીયૈઃ ॥ ૧૨॥

અગ્રે ભર્તુઃ સરસિજમયે ભદ્રપીઠે
    નિષણ્ણામમ્ભોરાશેરધિગતસુધાસમ્પ્લવાદુત્થિતાં ત્વામ્ ।
પુષ્પાસારસ્થગિતભુવનૈઃ પુષ્કલાવર્તકાદ્યૈઃ
    ક્લૃપ્તારમ્ભાઃ કનકકલશૈરભ્યષિઞ્ચન્ગજેન્દ્રાઃ ॥ ૧૩॥

આલોક્ય ત્વામમૃતસહજે વિષ્ણુવક્ષઃસ્થલસ્થાં
    શાપાક્રાન્તાઃ શરણમગમન્સાવરોધાઃ સુરેન્દ્રાઃ ।
લબ્ધ્વા ભૂયસ્ત્રિભુવનમિદં લક્ષિતં ત્વત્કટાક્ષૈઃ
    સર્વાકારસ્થિરસમુદયાં સમ્પદં નિર્વિશન્તિ ॥ ૧૪॥

આર્તત્રાણવ્રતિભિરમૃતાસારનીલામ્બુવાહૈ-
    રમ્ભોજાનામુષસિ મિષતામન્તરઙ્ગૈરપાઙ્ગૈ ।
યસ્યાં યસ્યાં દિશિ વિહરતે દેવિ દૃષ્ટિસ્ત્વદીયા
    તસ્યાં તસ્યામહમહમિકાં તન્વતે સમ્પદોઘાઃ ॥ ૧૫॥

યોગારમ્ભત્વરિતમનસો યુષ્મદૈકાન્ત્યયુક્તં ધર્મં
    પ્રાપ્તું પ્રથમમિહ યે ધારયન્તેઽધના યામ્ ॥

તેષાં ભૂમેર્ધનપતિગૃહાદમ્બુધેર્વા પ્રકામં ધારા
    નિર્યાન્ત્યધિકમધિકં વાઞ્છિતાનાં વસૂનામ્ ॥ ૧૬॥

શ્રેયસ્કામા યમલનિલયે ચિત્રમામ્નાયવાચાં
    ચૂડાપીડં તવ પદયુગં ચેતસા ધારયન્તઃ ।
છત્રચ્છાયાસુભગશિરસશ્ચામરસ્મેરપાર્શ્વાઃ
    શ્લાઘાશબ્દશ્રવણમુદિતાઃ સ્રગ્વિણઃ સઞ્ચરન્તિ ॥ ૧૭॥

ઊરીકર્તું કુશલમખિલં જેતુમાદીનરાતીન્
    દૂરીકર્તું દુરિતનિવહં ત્યક્તુમાદ્યામવિદ્યામ્ ।
અમ્બ સ્તમ્બાવધિકજનનગ્રામસીમાન્તરેખામાલમ્બન્તે
    વિમલમનસો વિષ્ણુકાન્તે દયા તે ॥ ૧૮॥

જાતાકાંક્ષા જનનિ યુવયોરેકસેવાધિકારે
　　માયાલીઢં વિભવમખિલં મન્યમાનાસ્તૃણાય ।
પ્રીત્યૈ વિષ્ણોસ્તવ ચ કૃતિનઃ પ્રીતિમન્તો ભજન્તે
　　વેલાભઙ્ગપ્રશમનફલં વૈદિકં ધર્મસેતુમ્ ॥ ૧૯॥

સેવે દેવિ ત્રિદશમહિલામૌલિમાલાર્ચિતં તે
　　સિદ્ધિક્ષેત્રં શમિતવિપદાં સમ્પદાં પાદપદ્મમ્ ।
યસ્મિન્નીષન્નમિતશિરસો યાપયિત્વા શરીરં
　　વર્તિષ્યન્તે વિતમસિ પદે વાસુદેવસ્ય ધન્યાઃ ॥ ૨૦॥

સાનુપ્રાસપ્રકટિતદયૈઃ સાન્દ્રવાત્સલ્યદિગ્ધૈરમ્બ
　　સ્નિગ્ધૈરમૃતલહરીલબ્ધસબ્રહ્મચર્યૈઃ ।
ઘર્મે તાપત્રયવિરચિતે ગાઢતમં ક્ષણં
　　મામાકિઞ્ચન્યગ્લપિતમનઘૈરાદ્રિયેથાઃ કટાક્ષૈઃ ॥ ૨૧॥

સમ્પદ્યન્તે ભવભયતમીભાનવસ્ત્વત્પ્રસાદાદ્ભાવાઃ
　　સર્વે ભગવતિ હરૌ ભક્તિમુદ્વેલયન્તઃ ।
યાચે કિં ત્વામહમિહ યતઃ શીતલોદારશીલા
　　ભૂયો ભૂયો દિશસિ મહતાં મઙ્ગલાનાં પ્રબન્ધાન્ ॥ ૨૨॥

માતા દેવિ ત્વમસિ ભગવાન્વાસુદેવઃ પિતા મે
　　જાતઃ સોઽહં જનનિ યુવયોરેકલક્ષ્યં દયાયાઃ ।
દત્તો યુષ્મત્પરિજનતયા દેશિકૈરપ્યતસ્ત્વં કિં તે
　　ભૂયઃ પ્રિયમિતિ કિલ સ્મેરવક્ત્રા વિભાસિ ॥ ૨૩॥

કલ્યાણાનામવિકલનિધિઃ કાઽપિ કારુણ્યસીમા
　　નિત્યામોદા નિગમવચસાં મૌલિમન્દારમાલા ।
સમ્પદ્દિવ્યઃ મધુવિજયિનઃ સન્નિધત્તાં સદા
　　મે સૈષા દેવી સકલભુવનપ્રાર્થનાકામધેનુઃ ॥ ૨૪॥

ઉપચિતગુરુભક્તેરુત્થિતં વેઙ્કટેશાત્કલિ-
　　કલુષનિવૃત્ત્યૈ કલ્પ્યમાનં પ્રજાનામ્ ।
સરસિજનિલયાયાઃ સ્તોત્રમેતત્પઠન્તઃ
　　સકલકુશલસીમા સાર્વભૌમા ભવન્તિ ॥ ૨૫॥

કવિતાર્કિકસિંહાય કલ્યાણગુણશાલિને ।
શ્રીમતે વેઙ્કટેશાય વેદાન્તગુરવે નમઃ ॥

॥ ઇતિ શ્રીવેદાન્તદેશિકવિરચિતા શ્રીસ્તુતિઃ સમ્પૂર્ણા ॥

ઇતિ શ્રીકવિરાર્કિકસંઇહસ્ય સર્વતન્ત્રસ્વતન્ત્રસ્ય શ્રીમદ્વેઙ્કટનાથસ્ય
વેદાન્તાચાર્યસ્ય કૃતિષુ કનકધારાશ્રીલક્ષ્મીસ્તવરાજઃ સમ્પૂર્ણઃ ॥

Proofread by Ravin Bhalekar ravibhalekar at hotmail.com

*shrIstutiH by Swami Vedanta Desika*

pdf was typeset on June 4, 2022

Please send corrections to *sanskrit@cheerful.com*